Shri Ganesha Stuti Lakshminarayanakrita

श्रीगणेशस्तुतिः लक्ष्मीनारायणकृता

Document Information

Text title : Shri Ganesha Stuti Lakshminarayanakrita

File name : gaNeshastutiHlakShmInArAyaNakRRitA.itx

Category : ganesha, stuti

Location : doc_ganesha

Author : Lakshminarayana

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

sanskritdocuments.org

श्रीगणेशस्तुतिः लक्ष्मीनारायणकृता

गुणग्रामार्चितो नेता क्रियते स्वो जनैरिति ।
गुणेशत्वेन शंसन्तं गुणाब्धिं तं मुहुर्नमः ॥ १॥

यः स्वल्पमप्यञ्चति सद्गुणोदयं मूर्ध्नोचितं तस्य समर्हणं सताम् ।
इत्यालपन्बालकलाधरं दधत्स्याद्भूतये भालकलाधरो मम ॥ २॥

नेत्रद्वन्द्वं साधुने जीवनाय नालं, तस्माज्ज्ञाननेत्रं ध्रियेत ।
इत्यक्ष्णा संसूचयन्भालगेन नागास्यो नः पातु धीवारिराशिः ॥ ३॥

नेता विशाल मुदितास्य उदारचेताः
स्यात्सर्वदैव सुमुखः स्वजने प्रवृत्तः ।
इत्युद्गिरन् प्रमुदितास्यतयाऽन्तराय
ध्वान्तापहाऽस्तु शरणं मम कोऽपि भास्वान् ॥ ४॥

हसितविभूषितवदनो जनोऽस्तु सकलोऽपि मोदसम्पत्त्यै ।
इति रददर्शितहृदयः स एकदन्तोऽस्तु मे शरणम् ॥ ५॥

लोकाराधनकर्म दिग्गजमहामूर्धैव कर्तुं प्रभुः
घ्रातुं सर्वगभीरमानसमलं स्याद्दीर्घघोणः पुमान् ।
भङ्ग्याऽऽस्यस्य तथा दधातु मतिमान् नीचेषु चोपेक्षणं
इत्याख्यान् करिवक्रवक्रिमरुचाऽव्यान्नो गणेशो निजान् ॥ ६॥

नेता समस्य शृणुयादपि कष्टवार्तां
रक्षन् सदा सहृदयो विपुलश्रवस्त्वम् ।
इत्युद्गिरन् स शरणं गजकर्णकत्व
स्वीकारवर्यविधिनास्तु गजाननो नः ॥ ८॥

लोकः समोऽपि हृदि विप्रियमन्यदत्तं
तूष्णीं दधत् प्रकटयेत् स्वमहाशयत्वम् ।
इत्यादिशन्नुदधिशोभ्युदरादरेण

लम्बोदरः स भगवानवलम्बनं स्यात् ॥ ८॥

रागमयं स्वावरणं रक्ष्यं सर्वैः स्वकीयहितकार्यैः ।
इति रक्ताम्बरधृत्याऽऽख्यान् गणपो नः कृपानिधिः पायात् ॥ ९॥

स्वकमिह धवलीकरोतु सर्वः सुकृत भरैरवदातकान्ति वित्तैः ।
इति सितवदनत्विषां प्रसारैः द्विपवदनोऽवतु वेदयन्निजान्नः ॥ १०॥

आरूढो जननायकस्य पदवीं लोकस्य सर्वापदां
नाशायाविरतं हिताय च भवेत् सक्तो मनीषी जनः ।
इत्याख्यानभयं वरं च करयोर्लान्त्या सतोर्मुद्रया
दीनानुग्रहकातरः स भगवान् विघ्नेश्वरः पातु नः ॥ ११॥

नेता नियन्त्रयितुमेव सदाऽखिलानां
बद्धादरो भवतु सेतुभिदां खलानाम् ।
इत्यन्तरायसमुदायहरो भवेन्नः
संसूचयन् स मुदितोऽङ्कुशधारणेन ॥ १२॥

प्रेमार्द्रं प्रथितगुणं प्रतत्य पाशं
मोदन्तां वशमखिलं समे नयन्तः ।
इत्याख्यान् करगत पाशरश्मिनाऽसौ
विघ्नेशो जयतु समस्तकामपूरः ॥ १३॥

जन इह सकलः प्रसादकः स्यात् स जनतयाऽऽद्रियते, विषादको न ।
इति पिशुनयतीव मोदकानां ग्रहविधिना बत कोऽपि नः शरण्यः ॥ १४॥

या नार्यः स्वीयभर्तॄन् सततमनुरताः सेवया तोषयन्ति
पातिव्रत्यप्रसादादिह हि दधति ता ऋद्धितां सिद्धितां च ।
दारेषु स्वेषु रक्तः सुसुखमनुभवन् स्याच्च ना हृष्टपुष्टः
इत्यन्योन्यस्निहा नः पिपुरतु गणपस्तत् प्रिये चोद्गिरन्तः ॥ १५॥

कदाचिन्नो तुच्छेष्वपि परिवृढा यायुररुचिं
परं स्वीकुर्युस्तान् निजजनतया स्नेहसहितम् ।
इति व्याख्यानाखुं वहनमुररीकृत्य विहृतैः
गणानामीशः स्वानवतु सततं विघ्नविसरात् ॥

मातरि तथोपमातरि सूनुत्वेनैव वर्ततां सकलः ।
इति गणपोऽवतु शंसन् गङ्गागौर्योः सुतत्त्वसाम्येन ।

नेता स्यादिह यः पुमान् स मतिमान् लोकस्य कल्याणकृत्
खेदच्छेदशुभाभिवर्धन विधेर्विघ्नान् विनिघ्नन् सदा ।
वर्तेतेति स लोकनायकनयं विघ्नौघविध्वंसनैः
शंसन्नः सुषमाविभूषिततनुः पायाद्गणाधीश्वरः ॥

इति लक्ष्मीनारायणकृता श्रीगणेशस्तुतिः सम्पूर्णा ।

Proofread by Narendran Madathil

Shri Ganesha Stuti Lakshminarayanakrita

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*